विकाशग्रीवः । ( यथा, मार्कण्डेये । ७५ ।२६ ।
"विवेश वह्निशालां वै प्रष्ठारं प्राह हव्यभुक् ॥")

प्रष्ठः, त्रि, ( प्रतिष्ठते अग्रतो गच्छतीति । प्र + स्था + "सुपि स्थः ।" ३।२।४। इति कः । "प्रष्ठोऽग्रगामिनि ।" ८ । ३ । ९२ । इति षत्वम् । ) अग्रगामी । इत्यमरः । २ । ८ । ७२ ॥ ( यथा, रघुः । १५ । १० ।
"आदिष्टवर्त्मा मुनिभिः स गच्छंस्तपतां वरः ।
विरराज रथप्रष्ठैर्वालखिल्यैरिवांशुमान् ॥" )

प्रष्ठवाट्, [ ह् ] पुं, ( प्रष्ठः अग्रगामी सन् वहतीति । प्रष्ठ + वह् + "वहश्च ।" ३ । २ । ६४ । इति ण्विः । ) युगपार्श्वगः । इत्यमरः । २ । ९ । ६३ ॥ शिक्षार्थं युगवाहिपार्श्वयोजितः । इति भरतः ॥ योजितं युगपार्श्वे दमनार्थं यं बालिका आमयन्ति सः । इति मधुः ॥ युवा गौर्दमनाय योजितः । इत्यन्ये ॥

प्रष्ठी, स्त्री, ( प्रष्ठ + ङीष् । ) प्रष्ठभार्य्या । अग्रगामिपत्नी । इति जटाधरः ॥

प्रष्ठौही, स्त्री, ( प्रष्ठवाह् + "वाहः ।" ४ । १ । ६१ । इति ङीष् । ) बालगर्भिणी । प्रथमगर्भवती गौः । प्रष्ठं प्रथमगर्भं वहति या सा । बाला सती गर्भिणी प्रथमगर्भवत्यर्थः । इति भरतः ॥ (यथा, महाभारते । १३ ।९३ ।३३ ।
"प्रष्ठौहीनां पीवराणाञ्च तावद्
अग्र्या सृष्टी धेनवः सुव्रताश्च ॥")

प्रस, म ष ङ प्रसवे । तलौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् । ) रेफयुक्तादिः । म, प्रसयति । ष, प्रसा । ङ, प्रसते कीर्त्तिं विद्या । प्रसते विस्तारयतीत्यर्थः । इति दुर्गादासः ॥

प्रसक्तं, क्ली, ( प्र + सन्ज + क्त । ) नित्यम् । इति जटाधरः ॥ ( यथा, माधवकृततत्त्वविनिश्चयस्य कासाधिकारे ।
"प्रसक्तवेगस्तु समीरणेन
भिन्नस्वरः कासति शुष्कमेव ॥"
"प्रसक्तवेगः सततकासवेगः ।" इति तट्टीकायां विजयरक्षितः ।) तद्वति, त्रि ॥ (आसक्तः । यथा, गीतायाम् । १६ । १६ ।
"अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥" )

प्रसक्तिः, स्त्री, (प्र + सन्ज + भावे क्तिन् ।) प्रसङ्गः । (यथा, किराते । ५ । ५० ।
"मा भूवन्नपथहरास्तवेन्द्रियाश्वाः
सन्तापे दिशतु शिवः शिवां प्रसक्तिम् ॥")
अनुमितिः । आपत्तिः । इति सव्यभिचारशिरोमणिः ॥

प्रसङ्गः, पुं, (प्र + सन्ज + घञ् ।) सङ्गतिविशेषः । यथा,—
"स प्रसङ्ग उपोद्घातो हेतुतावसरस्तथा ।
निर्व्वाहकैककार्य्यत्वे षोढ़ा सङ्गतिरिष्यते ॥"
तस्य लक्षणम् । स्मृतस्योपेक्षानर्हत्वम् । तदर्थस्तु स्मृतिविषयतापन्नत्वे सति द्वेषविषयतानापन्नत्वम् । इत्यनुमितिग्रन्थे गदाधरभट्टाचार्य्यः ॥ * ॥ ("प्रकरणान्तरेण समापनं प्रसङ्गः । यथा प्रकारान्तरितो योऽर्थोऽसकृदुक्तः समाप्यते स प्रसङ्गः । यथा । महाभूतशरीरिसमवायः पुरुषस्तस्मिन् सोऽधिष्ठानमिति वेदोत्पत्तावभिधाय भूतविद्यायां पुनरुक्तं यतोऽभिहितं पञ्च महाभूतशरीरिसमवायः पुरुष इति स खल्वेवं कर्म्म पुरुषश्चिकित्सायामधिकृतः ॥" इत्युत्तरतन्त्रे पञ्चषष्टितमेऽध्याये सुश्रुतेनोक्तम् ॥ ) अन्योद्देशेन प्रवृत्तावन्यस्यापि सिद्धिः । यथा,—
"दृष्टा तु हरते पापं स्पृष्टा तु त्रिदिवं नयेत् ।
प्रसङ्गेनापि या गङ्गा मोक्षदा त्ववगाहिता ॥"
इति प्रायश्चित्ततत्त्वम् ॥ * ॥
( यथा च देवीभागवते । ३ । ९ । ४२ ।
"अज्ञातमपि तन्नाम प्रसङ्गेनापि भाषितम् ।
ददाति वाञ्छितानर्थान् दुर्लभानपि सर्व्वथा ॥")
प्रसक्तिः । यथा,—
"आनीता भवता यदा पतिरता साध्वी धरित्रीसुता
सुग्रीवाद्यसमाश्रया न च कथं रामाङ्गसङ्गीकृतम् ।
कर्त्तुं चेतसि पुण्डरीकनयनं दूर्व्वादलश्यामलं
तुच्छं ब्रह्मपदं भवेत् परवधूसङ्गप्रसङ्गः कुतः ॥"
इति नाटकम् ॥ * ॥
प्रस्तावः । यथा,—
"तत्रैव गङ्गा यमुना च तत्र
गोदावरी तत्र सरस्वती च ।
सर्व्वाणि तीर्थानि वसन्ति तत्र
यत्राच्युतोदारकथाप्रसङ्गः ॥"
इति पौराणिकाः ॥ * ॥
मैथुनम् । यथा । प्रसङ्गनित्यहुतपृष्ठयानादिति रुग्विनिश्चयवचनटीकायां विजयरक्षितः ॥ ( यथा च देवीभागवते । १ । १२ । २० ।
"ऋषयोऽपि तयोर्वीक्ष्य प्रसङ्गं रममाणयोः ।
परित्यज्य ययुस्तूर्णं नरनारायणाश्रमम् ॥" )

प्रसज्यप्रतिषेधः, पुं, ( प्रसज्य प्रवृत्तिं सम्पाद्य प्रतिषेधो निषेधः ।) निषेधविशेषः । तल्लक्षणं यथा,
"अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥"
अस्योदाहरणम् । भोजराजः ।
"पौषे चैत्रे कृष्णपक्षे नवान्नं नाचरेद्बुधः ।
भवेज्जन्मान्तरे रोगी पितॄणां नोपतिष्ठते ॥"
अत्र रोगीतिनिन्दाश्रवणात् प्रसज्यता । नोपतिष्ठते इति श्रवणात् पर्य्युदासता । इति मलमासतत्त्वम् ॥

प्रसत्तिः, स्त्री, ( प्र + सद् + क्तिन् । ) प्रसन्नता । नैर्म्मल्यम् । इति जटाधरः ॥

प्रसत्वरी, स्त्री, ( प्रसत्वन् + "वनो रच ।" ४ । १ । ७ । इति ङीप् रश्च । ) प्रतिपत्तिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

प्रसत्वा, [ न् ] पुं, ( प्रसीदतीति । प्र + सद् + क्वनिप् । ) धर्म्मः । प्रजापतिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

प्रसन्नः, त्रि, ( प्रसीदतीति । प्र + सद् + गत्यर्थेति क्तः । ) निर्म्मलः । तत्पर्य्यायः । अच्छः २ । इत्यमरः । १ । १० । १४ ॥ (यथा, महाभारते । ४ । २७ । २४ ।
"रसाः स्पर्शाश्च गन्धाश्च शब्दाश्चापि गुणान्विताः ।
दृश्यानि च प्रसन्नानि यत्र राजा युधिष्ठिरः ॥")
सन्तुष्टः । इति मेदिनी । ने, ८६ ॥ ( यथा, रघुः । ५ । १० ।
"अपि प्रसन्नेन महर्षिणा त्वं
सम्यग्विनीयानुमतो गृहाय ॥" )

प्रसन्नता, स्त्री, ( प्रसन्न + तल् ।) प्रसन्नस्य भावः । तत्पर्य्यायः । प्रसादः २ । इत्यमरः । १।३। १६ ॥ ( यथा, हठयोगप्रदीपिकायाम् । २ । ७८ ।
"वपुः कृशत्वं वदने प्रसन्नता
नादस्फुटत्वं नयने सुनिर्म्मले ॥" )

प्रसन्ना, स्त्री, ( प्रसन्न + टाप् ।) सुरा । इत्यमरः । २ । १० । ४० ॥ मद्यविशेषः । तस्य गुणाः ।
"प्रसन्ना गुल्मवातार्शोविबन्धानाहनाशिनी ।
शूलप्रवाहिकाटोपकफवातार्शसां हिता ॥"
इति राजवल्लभः ॥
प्रसादविशिष्टा । यथा, मार्कण्डेये । ८१ । ४३ ।
"सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥"

प्रसन्नेरा, स्त्री, ( प्रसन्ना निर्म्मला इरा जलमिव । ) मदिरा । इत्यमरटीकायां भरतः । २।१०।४० ॥)

प्रसभः, पुं ( प्रगता सभा सभाधिकारी यस्मात् ।) बलात्कारः । इत्यमरः । २ । ८ । १०८ ॥ ( यथा, श्रीकण्ठचरिते । ५ । ४२ ।
"यस्मिन् विनिर्म्मितवति प्रसभं प्रकोपा-
दत्युग्रनिग्रहनवानुभवोपदेशम् ॥")

प्रसरः, पुं, ( प्र + सृ + भावादौ यथायथं अप् । ) तन्तुवृक्षविटपादेर्व्विसर्पणम् । प्रकर्षेण निकटे सरणं सर्पणम् । तत्पर्य्यायः । विसर्पः २ । इत्यमरभरतौ । ३।२।२३ ॥ ( यथा, रघुः ।१६।२० ।
"तिरस्क्रियन्ते कृमितन्तुजालै-
र्विच्छिन्नधूमप्रसरा गवाक्षाः ॥" )
प्रणयः । वेगः । इति मेदिनी । रे, १८२ ॥ ( यथा, कलाविलासे । १ । २१ ।
"इति विनयनम्रशिरसा तेन वचो युक्तमुक्तमवधार्य्य ।
तमुवाच मूलदेवः प्रीतिप्रसरैः प्रसारितोत्साहः ॥" )
समूहः । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । ५८६ ।
"स्तननूतननखलेखालम्बी तव घर्म्मबिन्दुसन्दोहः ।
आभाति पद्मसूत्रे प्रविशन्निव मौक्तिकप्रसरः ॥"
प्रकृष्टसरणम् । यथा,—
"अत ऊर्द्ध्वं प्रसरं वक्ष्यामः । तैरामेभिरातङ्कविशेषैः प्रकुपितानां पर्य्युषितकिण्वोदकपिष्टसमवाय इवोद्रिक्तानां प्रसरो भवति तेषां वायुर्गतिमत्त्वात् प्रसरणहेतुः सत्यप्यचैतन्ये स हि